✧˖°*❋ ❋*°˖✧

# মুকুংদমালা স্তোত্রম্

## Mukunda Mala Stotram

in bengali

✧˖°*❋ ❋*°˖✧

# ॥ মুকুংদমালা স্তোত্রম্ ॥

ঘুষ্যতে যস্য নগরে রংগযাত্রা দিনে দিনে ।
তমহং শিরসা বংদে রাজানং কুলশেখরম্ ॥

শ্রীবল্লভেতি বরদেতি দযাপরেতি
ভক্তপ্রিযেতি ভবলুংঠনকোবিদেতি ।
নাথেতি নাগশযনেতি জগন্নিবাসে-
-ত্যালাপনং প্রতিপদং কুরু মে মুকুংদ ॥ 1 ॥

জযতু জযতু দেবো দেবকীনংদনোঽযং
জযতু জযতু কৃষ্ণো বৃষ্ণিবংশপ্রদীপঃ ।
জযতু জযতু মেঘশ্যামলঃ কোমলাংগো
জযতু জযতু পৃথ্বীভারনাশো মুকুংদঃ ॥ 2 ॥

মুকুংদ মূর্ধ্না প্রণিপত্য যাচে
ভবংতমেকাংতমিযংতমর্থম্ ।
অবিস্মৃতিস্ত্বচ্চরণারবিংদে
ভবে ভবে মেঽস্তু ভবত্প্রসাদাত্ ॥ 3 ॥

নাহং বংদে তব চরণযোর্দ্বংদ্বমদ্বংদ্বহেতোঃ
কুংভীপাকং গুরুমপি হরে নারকং নাপনেতুম্ ।
রম্যারামামৃদুতনুলতা নংদনে নাপি রংতুং
ভাবে ভাবে হৃদযভবনে ভাবযেযং ভবংতম্ ॥ 4 ॥

নাস্থা ধর্মে ন বসুনিচযে নৈব কামোপভোগে
যদ্যদ্ভব্যং ভবতু ভগবন্ পূর্বকর্মানুরূপম্ ।
এতত্প্রার্থ্যং মম বহুমতং জন্মজন্মাংতরেঽপি
ত্বত্পাদাংভোরুহযুগগতা নিশ্চলা ভক্তিরস্তু ॥ 5 ॥

দিবি বা ভুবি বা মমাস্তু বাসো
নরকে বা নরকাংতক প্রকামম্ ।
অবধীরিত শারদারবিংদৌ
চরণৌ তে মরণেঽপি চিংতযামি ॥ 6 ॥

কৃষ্ণ ত্বদীয পদপংকজপংজরাংত-
-মদ্যৈব মে বিশতু মানসরাজহংসঃ ।
প্রাণপ্রযাণসমযে কফবাতপিত্তৈঃ
কংঠাবরোধনবিধৌ স্মরণং কুতস্তে ॥ 7 ॥

চিংতযামি হরিমেব সংততং
মংদমংদ হসিতাননাংবুজং
নংদগোপতনযং পরাত্পরং
নারদাদিমুনিবৃংদবংদিতম্ ॥ 8 ॥

করচরণসরোজে কাংতিমন্নেত্রমীনে
শ্রমমুষি ভুজবীচিব্যাকুলেঽগাধমার্গে ।
হরিসরসি বিগাহ্যাপীয তেজোজলৌঘং
ভবমরুপরিখিন্নঃ খেদমদ্য ত্যজামি ॥ 9 ॥

সরসিজনযনে সশংখচক্রে
মুরভিদি মা বিরম স্বচিত্ত রংতুম্ ।
সুখতরমপরং ন জাতু জানে
হরিচরণস্মরণামৃতেন তুল্যম্ ॥ 10 ॥

মা ভীর্মংদমনো বিচিংত্য বহুধা যামীশ্চিরং যাতনাঃ
নামী নঃ প্রভবংতি পাপরিপবঃ স্বামী ননু শ্রীধরঃ ।
আলস্যং ব্যপনীয ভক্তিসুলভং ধ্যাযস্ব নারাযণং
লোকস্য ব্যসনাপনোদনকরো দাসস্য কিং ন ক্ষমঃ ॥ 11 ॥

ভবজলধিগতানাং দ্বংদ্ববাতাহতানাং
সুতদুহিতৃকলত্রত্রাণভারার্দিতানাম্ ।
বিষমবিষযতোযে মজ্জতামপ্লবানাং
ভবতু শরণমেকো বিষ্ণুপোতো নরাণাম্ ॥ 12 ॥

ভবজলধিমগাধং দুস্তরং নিস্তরেযং
কথমহমিতি চেতো মা স্ম গাঃ কাতরত্বম্ ।
সরসিজদৃশি দেবে তাবকী ভক্তিরেকা
নরকভিদি নিষণ্ণা তারযিষ্যত্যবশ্যম্ ॥ 13 ॥

তৃষ্ণাতোযে মদনপবনোদ্ধূত মোহোর্মিমালে
দারাবর্তে তনযসহজগ্রাহসংঘাকুলে চ ।
সংসারাখ্যে মহতি জলধৌ মজ্জতাং নস্ত্রিধামন্
পাদাংভোজে বরদ ভবতো ভক্তিনাবং প্রযচ্ছ ॥ 14 ॥

মাদ্রাক্ষং ক্ষীণপুণ্যান্ ক্ষণমপি ভবতো ভক্তিহীনান্পদাব্জে
মাশ্রৌষং শ্রাব্যবংধং তব চরিতমপাস্যান্যদাখ্যানজাতম্ ।
মাস্মার্ষং মাধব ত্বামপি ভুবনপতে চেতসাপহ্নুবানা-
-ন্মাভূবং ত্বত্সপর্যাব্যতিকররহিতো জন্মজন্মাংতরেঽপি ॥ 15 ॥

জিহ্বে কীর্তয কেশবং মুররিপুং চেতো ভজ শ্রীধরং
পাণিদ্বংদ্ব সমর্চযাচ্যুতকথাঃ শ্রোত্রদ্বয ত্বং শৃণু ।
কৃষ্ণং লোকয লোচনদ্বয হরের্গচ্ছাংঘ্রিযুগ্মালযং
জিঘ্র ঘ্রাণ মুকুংদপাদতুলসীং মূর্ধন্নমাধোক্ষজম্ ॥ 16 ॥

হে লোকাঃ শৃণুত প্রসূতিমরণব্যাধেশ্চিকিত্সামিমাং
যোগজ্ঞাঃ সমুদাহরংতি মুনযো যাং যাজ্ঞবল্ক্যাদযঃ ।
অংতর্জ্যোতিরমেযমেকমমৃতং কৃষ্ণাখ্যমাপীযতাং
তত্পীতং পরমৌষধং বিতনুতে নির্বাণমাত্যংতিকম্ ॥ 17 ।

হে মর্ত্যাঃ পরমং হিতং শৃণুত বো বক্ষ্যামি সংক্ষেপতঃ
সংসারার্ণবমাপদূর্মিবহুলং সম্যক্প্রবিশ্য স্থিতাঃ ।
নানাজ্ঞানমপাস্য চেতসি নমো নারাযণাযেত্যমুং
মংত্রং সপ্রণবং প্রণামসহিতং প্রাবর্তযধ্বং মুহুঃ ॥ 18 ॥

পৃথ্বীরেণুরণুঃ পযাংসি কণিকাঃ ফল্গুঃ স্ফুলিংগোঽলঘু-
-স্তেজো নিঃশ্বসনং মরুত্তনুতরং রংধ্রং সুসূক্ষ্মং নভঃ ।
ক্ষুদ্রা রুদ্রপিতামহপ্রভৃতযঃ কীটাঃ সমস্তাঃ সুরাঃ
দৃষ্টে যত্র স তাবকো বিজযতে ভূমাবধূতাবধিঃ ॥ 19 ॥

বদ্ধেনাংজলিনা নতেন শিরসা গাত্রৈঃ সরোমোদ্গমৈঃ
কংঠেন স্বরগদ্গদেন নযনেনোদ্গীর্ণবাষ্পাংবুনা ।
নিত্যং ত্বচ্চরণারবিংদযুগল ধ্যানামৃতাস্বাদিনা-
-মস্মাকং সরসীরুহাক্ষ সততং সংপদ্যতাং জীবিতম্ ॥ 20 ॥

হে গোপালক হে কৃপাজলনিধে হে সিংধুকন্যাপতে
হে কংসাংতক হে গজেংদ্রকরুণাপারীণ হে মাধব ।
হে রামানুজ হে জগত্ত্রযগুরো হে পুংডরীকাক্ষ মাং
হে গোপীজননাথ পালয পরং জানামি ন ত্বাং বিনা ॥ 21 ॥

ভক্তাপাযভুজংগগারুডমণিস্ত্রৈলোক্যরক্ষামণিঃ
গোপীলোচনচাতকাংবুদমণিঃ সৌংদর্যমুদ্রামণিঃ ।
যঃ কাংতামণি রুক্মিণী ঘনকুচদ্বংদ্বৈকভূষামণিঃ
শ্রেযো দেবশিখামণির্দিশতু নো গোপালচূডামণিঃ ॥ 22 ॥

শত্রুচ্ছেদৈকমংত্রং সকলমুপনিষদ্বাক্যসংপূজ্যমংত্রং
সংসারোত্তারমংত্রং সমুপচিততমঃ সংঘনির্যাণমংত্রম্ ।
সর্বৈশ্বর্যৈকমংত্রং ব্যসনভুজগসংদষ্টসংত্রাণমংত্রং
জিহ্বে শ্রীকৃষ্ণমংত্রং জপ জপ সততং জন্মসাফল্যমংত্রম্ ॥ 23 ॥

ব্যামোহ প্রশমৌষধং মুনিমনোবৃত্তি প্রবৃত্ত্যৌষধং
দৈত্যেংদ্রার্তিকরৌষধং ত্রিভুবনী সংজীবনৈকৌষধম্ ।
ভক্তাত্যংতহিতৌষধং ভবভযপ্রধ্বংসনৈকৌষধং
শ্রেযঃপ্রাপ্তিকরৌষধং পিব মনঃ শ্রীকৃষ্ণদিব্যৌষধম্ ॥ 24 ॥

আম্নাযাভ্যসনান্যরণ্যরুদিতং বেদব্রতান্যন্বহং
মেদশ্ছেদফলানি পূর্তবিধযঃ সর্বে হুতং ভস্মনি ।
তীর্থানামবগাহনানি চ গজস্নানং বিনা যত্পদ-
-দ্বংদ্বাংভোরুহসংস্মৃতির্বিজযতে দেবঃ স নারাযণঃ ॥ 25 ॥

শ্রীমন্নাম প্রোচ্য নারাযণাখ্যং
কে ন প্রাপুর্বাংছিতং পাপিনোঽপি ।
হা নঃ পূর্বং বাক্প্রবৃত্তা ন তস্মিন্
তেন প্রাপ্তং গর্ভবাসাদিদুঃখম্ ॥ 26 ॥

মজ্জন্মনঃ ফলমিদং মধুকৈটভারে
মত্প্রার্থনীয মদনুগ্রহ এষ এব ।
ত্বদ্ভৃত্যভৃত্য পরিচারক ভৃত্যভৃত্য
ভৃত্যস্য ভৃত্য ইতি মাং স্মর লোকনাথ ॥ 27 ॥

নাথে নঃ পুরুষোত্তমে ত্রিজগতামেকাধিপে চেতসা
সেব্যে স্বস্য পদস্য দাতরি সুরে নারাযণে তিষ্ঠতি ।
যং কংচিত্পুরুষাধমং কতিপযগ্রামেশমল্পার্থদং
সেবাযৈ মৃগযামহে নরমহো মূকা বরাকা বযম্ ॥ 28 ॥

মদন পরিহর স্থিতিং মদীযে
মনসি মুকুংদপদারবিংদধাম্নি ।
হরনযনকৃশানুনা কৃশোঽসি
স্মরসি ন চক্রপরাক্রমং মুরারেঃ ॥ 29 ॥

তত্ত্বং ব্রুবাণানি পরং পরস্মা-
-ন্মধু ক্ষরংতীব সতাং ফলানি ।
প্রাবর্তয প্রাংজলিরস্মি জিহ্বে
নামানি নারাযণ গোচরাণি ॥ 30 ॥

ইদং শরীরং পরিণামপেশলং
পতত্যবশ্যং শ্লথসংধিজর্জরম্ ।
কিমৌষধৈঃ ক্লিশ্যসি মূঢ দুর্মতে
নিরামযং কৃষ্ণরসাযনং পিব ॥ 31 ॥

দারা বারাকরবরসুতা তে তনূজো বিরিংচিঃ
স্তোতা বেদস্তব সুরগণো ভৃত্যবর্গঃ প্রসাদঃ ।
মুক্তির্মাযা জগদবিকলং তাবকী দেবকী তে
মাতা মিত্রং বলরিপুসুতস্ত্বয্যতোঽন্যন্ন জানে ॥ 32 ॥

কৃষ্ণো রক্ষতু নো জগত্ত্রযগুরুঃ কৃষ্ণং নমস্যাম্যহং
কৃষ্ণেনামরশত্রবো বিনিহতাঃ কৃষ্ণায তস্মৈ নমঃ ।
কৃষ্ণাদেব সমুত্থিতং জগদিদং কৃষ্ণস্য দাসোঽস্ম্যহং
কৃষ্ণে তিষ্ঠতি সর্বমেতদখিলং হে কৃষ্ণ রক্ষস্ব মাম্ ॥ 33 ॥

তত্ত্বং প্রসীদ ভগবন্ কুরু ময্যনাথে
বিষ্ণো কৃপাং পরমকারুণিকঃ কিল ত্বম্ ।
সংসারসাগরনিমগ্নমনংতদীন-
-মুদ্ধর্তুমর্হসি হরে পুরুষোত্তমোঽসি ॥ 34 ॥

নমামি নারাযণপাদপংকজং
করোমি নারাযণপূজনং সদা ।
বদামি নারাযণনাম নির্মলং
স্মরামি নারাযণতত্ত্বমব্যযম্ ॥ 35 ॥

শ্রীনাথ নারাযণ বাসুদেব
শ্রীকৃষ্ণ ভক্তপ্রিয চক্রপাণে ।
শ্রীপদ্মনাভাচ্যুত কৈটভারে
শ্রীরাম পদ্মাক্ষ হরে মুরারে ॥ 36 ॥

অনংত বৈকুংঠ মুকুংদ কৃষ্ণ
গোবিংদ দামোদর মাধবেতি ।
বক্তুং সমর্থোঽপি ন বক্তি কশ্চি-
-দহো জনানাং ব্যসনাভিমুখ্যম্ ॥ 37 ॥

ধ্যাযংতি যে বিষ্ণুমনংতমব্যযং
হৃত্পদ্মমধ্যে সততং ব্যবস্থিতম্ ।
সমাহিতানাং সততাভযপ্রদং
তে যাংতি সিদ্ধিং পরমাং চ বৈষ্ণবীম্ ॥ 38 ॥

ক্ষীরসাগরতরংগশীকরা-
-ঽঽসারতারকিতচারুমূর্তযে ।
ভোগিভোগশযনীযশাযিনে
মাধবায মধুবিদ্বিষে নমঃ ॥ 39 ॥

যস্য প্রিযৌ শ্রুতিধরৌ কবিলোকবীরৌ
মিত্রে দ্বিজন্মবরপদ্মশরাবভূতাম্ ।
তেনাংবুজাক্ষচরণাংবুজষট্পদেন
রাজ্ঞা কৃতা কৃতিরিযং কুলশেখরেণ ॥ 40 ॥

**ইতি কুলশেখর প্রণীতং মুকুংদমালা ।**

✧ₓ·····°*❋ ❋*°·····ₓ✧

Free download PDF of all types of mantra, stotram,vandana,arati: chalisapdf.net